मूलेन प्रतिपूजयेद्भगवतीं चर्च्चीं प्रचण्डाद्भुत-
चारित्रामुरुगन्धसंयतधिया भक्त्या समा-
राध्य च।
शूलायामुकमन्त्रगीतरुधिरैः कृत्वा नवम्यां
बलिं
संप्राप्ते दशमीं तिथिञ्च दशमीं संप्राप्य संप्रेषयेत्॥
भगवत्याः प्रवेशादिविसर्गान्तास्च याः क्रियाः।
तिथावुदयगामिन्यां सर्व्वास्ताः कारयेद्बुधः॥'
अत्रोदयकालीनदण्डिकामात्रतिथौ सम्यक्पूज-
नासामर्थ्ये कालिकापुराणम्।
'सम्यक् कर्म्मोदिता पूजां यदि कर्त्तुं न शक्यति।
उपचारांस्तदा दातुं पञ्चैतान् वितरेत्तदा॥
गन्धं पुष्पञ्च धूपञ्च दीपं नैवेद्यमेव च।
अभावे गन्धपुष्पाभ्यां तदभावे च भक्तितः॥
संक्षेपपूजा कथिता तथा वस्त्रादिकं पुनः॥
प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत्॥'
अत्र प्रातःपदं पूर्व्वाह्णपरम्।
'अस्मै प्रपूजयेद्देवीं सप्तम्यादिदिनत्रये।
अष्टम्यां चतुरर्थीभिर्व्वा रात्रावृद्धिवशात्तिथेः॥'
अष्टम्यामुपवासः पुत्रवतो गृहस्थस्य निषिद्धः।
यथा कालिकापुराणम्।
'उपवासं महाष्टम्यां पुत्रवान् समाचरेत्।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत्॥
नवम्यां बलिदानन्तु कर्त्तव्यं वै यथाविधि।
जपं होमञ्च विधिवत् कुर्य्यात्तत्र विभूतये॥'
अत्र नवम्यां होमश्रुतेः पूर्व्वाषाढ़ायुताष्टम्यां
पूजाहोमाद्युपोषणं इति श्रुतेश्च उभयत्र एक-
तरस्मिन् वा होमः शारदायाः पूजाया नवम्यामेव
दक्षिणा देया॥ * ॥
अथाष्टम्यादिकेवलमहाष्टमी केवलमहानवमी-
कल्पा यथा,—
'भद्रकालीं पटे कृत्वा तत्र संपूजयेद्द्विजः।
आश्विने शुक्लपक्षस्य चाष्टम्यां नियतव्रतः॥
उपोषितो द्वितीयेऽह्नि पूजयेत् पुनरेव ताम्॥'
इति विष्णुधर्म्मोत्तरम्॥
'यस्त्वेकस्यामथाष्टम्यां नवम्यां वाथ साधकः।
पूजयेद्वरदां देवीं शुद्धभावेन चेतसा॥'
इति कालिकापुराणम्॥*॥
दुर्गाया ध्यानं यथा,—
'जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम्।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम्॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम्॥
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम्॥
मृणालायतसंस्पर्शदशबाहुसमन्विताम्।
त्रिशूलं दक्षिणे ध्यायेत् खड्गं चक्रं क्रमादधः।
तीक्ष्णवाणं तथा शक्तिं दक्षिणे सन्निवेशयेत्।
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च॥
घण्टां वा परशुं वापि वामतः सन्निवेशयेत्।
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत्॥
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम्।
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम्॥
रक्तरक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम्।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्॥
सपाशवामहस्तेन धृतकेशञ्च दुर्गया।
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत्॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम्।
किञ्चिदूर्द्ध्वं तथा वाममङ्गुष्ठं महिषोपरि॥
शत्रुक्षयकरीं देवीं दैत्यदानवदर्पहाम्।
प्रसन्नवदनां देवीं सर्व्वकामफलप्रदाम्।
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत्॥
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम्।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम्॥'
इति ध्यात्वा महास्नानपूर्व्वकषोड़शोपचारा-
दिना बलिदानादिभिः पूजयित्वा आवरणं
पूजयेत्॥ * ॥
अथ दशमीकृत्यम्।
'संपूज्य प्रेषणं कुर्य्याद्दशम्यां शावरोत्सवैः।'
देवीयात्राकाले निर्म्मञ्छनविधिमाह पूजारत्ना-
करे देवीपुराणम्।
'भक्त्या पिष्टप्रदीपाद्यैश्चूताश्वत्थादिपल्लवैः।
औषधीभिश्च मेध्याभिः सर्व्वबीजैर्यवादिभिः॥
नवम्यां पर्व्वकाले तु यात्राकाले विशेषतः।
यः कुर्य्यात् श्रद्धया वीर! दध्या नीराजनं नरः॥
शङ्खभेर्य्यादिनिनदैर्जयशब्दैश्च पुष्कलैः।
यावतो दिवसान् वीर! दध्ये नीराजनं कृतम्॥
तावत्कालसहस्राणि दुर्गालोके महीयते।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोके महीयते॥ * ॥
तद्दिने अपराजितापूजनम्। यथा,—
'आश्विने शुक्लपक्षस्य दशम्यां पूजयेत्तथा।
एकादश्यां न कुर्व्वीत पूजनञ्चापराजितम्॥'
तद्दिने राजा यात्रां कुर्य्यात्। यथा,—
'दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नृपः।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत्॥'
स्वयमशक्तौ खड्गादियात्रा कर्त्तव्या। यथा,—
'कार्य्यवशात्स्वयमगमने भूभर्त्तुः केचिदाहुरा-
चार्य्याः।
छत्रायुधाद्यमिष्टं वैजयिकं निर्गमे कुर्य्यात्॥'*॥
खञ्जनदर्शनफलादिर्यथा,—
'हस्तागते तु मित्रे यया दिशा खञ्जनं दान्तं
नृपः पश्येत्।
तया प्रयातस्य क्षिप्रमरातिर्व्वशमुपैति॥
कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम्।
शोभनं खञ्जनं पश्येत् जलगोगोष्ठसन्निधौ॥
अस्थेषु गोषु गजवाजिमहोरगेषु
राज्यप्रदः कुशलदः शुचिशाद्वलेषु।
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दुःखं ददाति बहुशः खलु खञ्जरीटः॥
अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनम्।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः॥

अथ विसर्ज्जनम्।
'नौयानैर्नरयानैर्व्वा नीत्वा भगवतीं शिवाम्।
स्रोतोजले प्रक्षिपेयुः क्रीड़ाकौतुकमङ्गलैः॥
परैर्नाक्षिप्यते यस्तु परं नाक्षिपते तु यः।
तस्य क्रुद्धा भगवती शापं दद्यात् सुदारुणम्॥"
इति तिथ्यादितत्त्वदुर्गोत्सवतत्त्वे॥
विसर्ज्जनमन्त्रो यथा,—
"दुर्गे देवि जगन्मातः! स्वस्थानं गच्छ पूजिते।
संवत्सरव्यतीते तु पुनरागमनाय वै॥
निमज्जाम्भसि देवि त्वं चण्डिकाप्रतिमा शुभा।
पुत्रायुर्धनवृद्ध्यर्थं स्थापितासि जले मया॥"*॥
विसर्ज्जनानन्तरं गृहमागत्य अच्छिद्रावधारणं
कृत्वा घटस्थजलेन एभिर्म्मन्त्रैर्यजमानमभि-
षिञ्चेत्। यथा,—
"ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञस्त्वेमहे उप-
प्रयन्तु मरुतः सुदानवे इन्द्रप्राशुर्भवासचा॥
ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणः प्रभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो वै नैरृतस्तथा।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितो शेषो दिक्पालाः पान्तु ते सदा।
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु धर्म्मपालाः सुसंयताः।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
ऋषयो मुनयो गावो देवमातर एव च॥
देवपत्न्योऽध्वरा नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च॥
औषधानि च रत्नानि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा ह्रदाः॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
एते त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये॥"
इति वृहन्नन्दिकेश्वरपुराणपद्धतिः॥*॥
अथ दुर्गानाममाहात्म्यम्।
"तवर्गस्य तृतीयोऽर्णः पञ्चमस्वरसंयुतः।
कवर्गस्य तृतीयोऽर्णो वह्निस्तस्योपरि स्थितः॥
द्वितीयस्वरसंयुक्तं नामेदं परिकीर्त्तितम्।
आरोग्यस्य च सम्पत्तेर्ज्ञानस्य च महोदये॥
नामेदं परमो हेतुर्मुक्तये भवभङ्गिनाम्।
कलिकाले विशेषेण महापातकिनामपि॥
निस्तारबीजं विज्ञेयं नामसंसारणं प्रिये!॥
परदाररतोऽपि स्यात् परद्रव्यापहारकः।
सोऽपि पापात् प्रमुच्येत यदि स्यादतिमानसी॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
एतेभ्योऽपि विमुच्येत यदि नाम स्मरेत् सुधीः॥"
इति रुद्रयामले॥
"दुर्गा दुर्गेति दुर्गेति दुर्गानाम परं मनुम्।
यो जपेत् सततं सुश्रि! जीवन्मुक्तः स मानवः।
मनोत्पाते महारोगे महाविपदि सङ्कटे।
महादुःखे महाशोके महाभयसमुत्थिते॥